# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

**सत्रान्तपरीक्षा – डिसेम्बर – २०१८**

**कक्षा** – शास्त्रीप्रथमवर्षम् (SEM- 1) **प्रश्नपत्रम्** – ८ **गुणा:** - ७०

**विषय:** - साहित्यम् **कोड – CE 1.1.2** **समय:** - ०२ त: ०५

**दिनाङ्क:** - २२/१२/२०१८ **सन्दर्भग्रन्थः** – रघुवंशम्(द्वितीयसर्ग:)

**(OLD)**

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नाङ्कितेषु द्वयो: ससन्दर्भं व्याख्यां कुरुत।** १०

(१) तस्या: खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥

(२) व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्ग: ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनो: प्रसूति: ॥

(३) तां देवतापित्रतिथिक्रियाऽर्थामन्वग्ययौ मध्यमलोकपाल: ।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ॥

**प्रश्नः – २ अधस्तनयो: कञ्चिद् एकं सविस्तारं वर्णयत।** १०

**१) महाकविकालिदासस्य जीवनवृत्तं लिखत।**

**२) रघुवंश-महाकाव्यस्य महत्त्वं प्रदर्शयत।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ कयोश्चिद् द्वयो: ससन्दर्भं व्याख्यां कुरुत।** १०

१) वत्सोत्सुकाऽपि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुर:फलानि ॥

२) इत्थं व्रतं धारयत: प्रजार्थं समं महिष्या महनीयकीर्ते: ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानिदीनोद्धरणेचितस्य ॥

३) अलं महीमाला तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्
न पादपोन्मूलनशक्ति रंह: शिलोच्चये मूर्च्छति मारुतस्य ॥

**प्रश्नः – ४ एकस्य विशदं विवरणं कुरुत।** १०

**(१)रघुवश-महाकाव्यस्य द्वितीयसर्गीया कथा सङ्क्षेपेण लेख्या।**

**(२)राज्ञ: दिलीपस्य गोसेवाप्रकारो वर्ण्यताम्।**

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः – ५ द्वयोः ससन्दर्भं व्याख्या कार्या।** १०

१. एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढ प्रतिभासि मे त्वम् ॥

२. क्षतात्किल त्रायत इत्युदग्रःक्षत्त्रस्य शब्दो भुवनेषु रूढः।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥

३. भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेना ॥

**प्रश्नः – ६ निम्नाङ्कितयोः यथोचितमेकं ग्रन्थोक्तदिशा वर्णयत।** १०

**१) दिलीपसिंहयोः संवादं वर्णयत।**

**२) द्वितीयसर्गाधारेण दिलीपस्य चरित्रचित्रणं कुरुत।**

## अन्वितयः १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ अधोलिखितेषु दशानां लघूत्तराणि लेख्यानि।** १०

१) रघुवंशमहाकाव्यस्य रचयिता कः ?

२) रघुवंशमहाकाव्यं कतिसर्गात्मकम् ?

३) द्वितीयसर्गस्य नाम किम् ?

४) सुदक्षिणा कया रीत्या नन्दिन्या मार्गम् अनुसृतवती?

५) नन्दिनी कैः चतुःसमुद्रं धारयति ?

६) रघुवंशमहाकाव्यस्य द्वितीयसर्गे कति श्लोकाः सन्ति ?

७) मनोः प्रसूतिः केन रक्षिता भवति ?

८) वसिष्ठस्य पत्न्याः नाम किम् ?

९) दिलीपः कया रीत्या नन्दिनीम् अन्वगच्छत् ?

१०)व्रतं धारयता दिलीपेन स्वभार्यया सह आश्रमे कति दिनानि व्यापितानि ?

११) वृक्षोत्पाटनसमर्थः कस्य वेगः कुत्र न प्रसरति ?

१२) सिंहस्य नाम किमासीत् ? स च कस्यानुचरः ?

१३) कः उदग्रः क्षत्त्रस्य शब्दः भुवनेषु रूढः ?

१४) कस्यां स्थितौ स्वामिनः पुरतः सन्निधातुम् अशक्यम्?

१५) नन्दिन्याः उपरि आक्रमेण कः उद्युक्तः अभवत् ?

****************